नं० ४६६९८ — प

भविष्योत्तरे हरितालिका — — व्रतकथा

पत्राणि-८

नं० ४६६६-घ

कपिलाषष्ठीव्रतकथा भविष्योत्तरे

नं० ४६६९-घ

पत्राणि ८ (अष्ट)

नं॰ ८९९-६-च
भविष्योत्तरे हरितालिकाव्रत कथा
पत्राणि ८ (अष्ट)

पूजापद्धति पत्रा ८

८

[illegible]

1.2

ह०रि०
१

॥ श्री ॥ गणेशाय नमः ॥ अथ हरितालिकाव्रतकथा ॥ मंदारमालाकुलितालकायै
कपालमालांकृतशेखराय ॥ दिव्यांबरायै च दिगंबराय नमः शिवायै च नमः ॥
शिवाय ॥ सूत उवाच ॥ कैलासशिखरे रम्ये गौरी पृच्छति शंकरं ॥ गौर्युवाच
गुह्याद्गुह्यतरं गुह्यं कथयस्व महेश्वर ॥ यद्व्रतं धर्मसर्वस्वमल्पायासं म
हत्फलं ॥ प्रसन्नोसि यदि प्रभो तथ्यं ब्रूहि ममाग्रतः ॥ केन व्रतप्रभावेन तपो
दानेन शंकर ॥ अनादिमध्यनिधनो भर्ता त्वं च जगत्प्रभुः ॥ ईश्वर उवाच १
शृणु देवि प्रवक्ष्यामि तवाग्रे व्रतमुत्तमं ॥ सुगुह्यं मम सर्वस्वं कथयामि

तव प्रिये॥ यथा उडुगणेष्वेवं ह्रोग्रहाणांनुदेवव॥ वर्णानां च यथा विप्रो देवानां
च यथा हरिः॥ वेदानां च यथा साम इन्द्रियाणां मनो यथा॥ नदीषु च यथा गं
गा पुराणानां च भारतं॥ तथा देवि मूणुष्वेदं यथा हृदिस्थं व्रतेश्वर॥ मेन व्रत
प्रभावेन प्राप्तमर्द्धासनं त्वया॥ तत्सर्वं कथयिष्यामि यथा ह्यत्रपुरा मया॥ भा
द्रमासि सिते पक्षे तृतीया हस्तसोमयुक्ता तस्यानुष्ठानमात्रेण सर्वपा
पैः प्रमुच्यते॥ शृणु देवि त्वया पूर्वं यजानं त्या व्रतं कृतं॥ तत्सर्वं कथयिष्या
मि यथा वृत्तं हिमाचले॥ पार्वत्युवाच॥ कथं कृतं मया पूर्वं व्रतानां व्रतमु

हरि॰
२
त्रमं ॥ तत्सर्वं श्रोतुमिच्छामि त्वत्तस्स कारणान्महेश्वर ॥ ईश्वर उवाच ॥ अस्तित
त्रमहादिव्यो हिमवान्पर्वतेश्वरः ॥ नानाद्रुमसमाकीर्णो नानाशृंगवि
चित्रितः ॥ नानावर्णसमायुक्तो नानापक्षिगणैर्वृतः ॥ यत्र देवाः सगंधर्वाः
सिद्धाश्चारणगुह्यकाः ॥ विहरंति सदा देवि गंधर्वा गीततत्पराः ॥ स्फाटिकैः
कांचनैः शृंगैर्मणिवैडूर्यभूषितैः ॥ श्लिष्टद्रुमैर्विभाकाशं हिमवान्नगराजते ॥ हिमवान्स च शृंगाढ्यो नानापातविचित्रितः ॥ अप्सरोभिस्तथा सिद्धै
तैः शोभितोयं नगेश्वरः ॥ तत्र त्वं पार्वति बाल्ये कुर्वती सुमहत्तपः ॥ अथ त्वं
२

द्वादशाब्दं दिविधूम्रपानं कृतं त्वया ॥ वत्सराणां चतुःषष्टिं पक्षपर्णाशनं कृतं ॥ पंचा
ग्निसाधने चैव कृतं । वर्षाणि येन त्वया ॥ वर्षाणां त्रीणि बहिर्वासो जलवासस्तथैव च
द्दष्टा तातेन तत्कष्टं चिंतया तु:स्थितोभवत् ॥ तस्यैवं चिंतमानस्य नारदो मु
निरागतः ॥ अर्घ्यादिभिस्तमभ्यर्च्य हिमवानभ्यभाषत ॥ मम भाग्येन संजा
तं नवचागमनं मुने ॥ न कार्यं विद्यते ते तत्तथापि वद मे प्रभो ॥ नारद उवाच ॥
हिमवान्वाञ्छया शुभे कार्ये विष्णुना प्रेषितोस्म्यहं ॥ विवाहस्यैव कार्यार्थं तत्समा
मीप्यमिहागतः ॥ योग्यं योग्याय दातव्यं कन्यारत्नमिदं त्वया ॥ वासुदेवस

हरि०
३

मोनास्ति ब्रह्मशक्रशिवादिषु । विंतानकार्या कन्येयं दीयतां मम संमतं ॥ हिमवा
नुवाच ॥ वासुदेवसमो देवो कन्येयं प्रार्थ्यते यदि ॥ तर्हि मया प्रदातव्या त्वदाज्ञाम
नकारणात ॥ तच्छ्रुत्वा प्रपयौ ह्रिष्टुः पुनारदः केशवं प्रति ॥ उपगम्य स्तुतिं देवं
शंखचक्रगदाधरं ॥ कृतांजलिपुटो भूत्वा स्तुतीडःस्त समुवाच ह ॥ नारद उवा
च देवतत्वकृतं कार्यं विवाहः क्रियतामिति ॥ हिमवानब्रवीद्वाक्यं तत्समर्थं स्तुव
तां मम इयं कन्या मया दत्ता देवाय गरुडध्वजे ॥ इति श्रुत्वा पितुर्वाक्यं शिवे तत्व
दुःखिता भवत ॥ दुःखभाराभिसंतप्तां सखीं वचनमब्रवीत ॥ कैं । मरखुवा

३

व॥ किमर्थं दुःखितेदेविकथयस्वममाग्रतः॥ येनभवत्याम्हितंकरिष्येहं
नसंशयः॥ पार्वत्युवाच॥ सखिशृणुममप्रीत्यामनोभिलषितंमया॥ क
पर्दिनंवभर्त्तारंकरिष्येहंनसंशयः॥ इत्येवंचिंतितंकार्यंतातेनकृतमन्यथा
तस्माद्देहपरित्यागंकरिष्येहंनसंशयः॥ पार्वत्यावचनंश्रुत्वासखीवद
नमब्रवीत्॥ सख्युवाच॥ नजानातिपितायत्रव्रजस्यतद्वनंमहत्॥ इत्येतत्सं
मतंकृत्वानीतासित्वंमहद्वनं॥ पिताविलोकयामासहिमवान्सगृहेगृहे
केननीतातमेपुत्रीदेवदानवकिंनरैः॥ सत्यंकृतंमयापूर्वंकिंदास्येगरु

हरि ४ उध्वजे।इत्येवंचिंतयाविष्टोमूर्छयापतितोभुवि।क्षणात्कत्वाततोलोका
द्रुपमभ्यधावज्जिरिंप्रति।मूर्छांप्राप्तात्वयाकस्मात्कथयस्वमहागिरे।हि
मवानुवाच।केनचैदुष्टवैरेणकन्यारत्नंहृतंममदृष्टावाकाल्पसर्पेणावासि
हव्याघ्रेणवाहृता।नजानेक्वगतापुत्रीकेनदुष्टेनवाहृता।पतितःशोक
संतप्तोवातेनेवयथातरुः।त्वंगतासिवनंघोरंनिर्जनंभयवर्द्धनं।व्या
घ्रसिंहगजक्रोडमृगपक्षिगणाकुलं।तस्मिन्घोरवनेत्वंहिसखीभिःसह
संस्थिता।दृष्ट्वातत्रनदींरम्यांतस्यास्तीरेमहागुहां।प्रविष्टासखीभि ४

सार्द्धं मन्नाहारविवर्जिता ॥ वालुकाभिः कृता मूर्त्तिः शिवयासहितस्य मे ॥
भाद्रे मासि तृतीयायां हस्तनक्षत्रसोमयुक् ॥ तत्र गीतेन वाद्येन रात्रौ जा
गरणं कृतं । तेन व्रत १ प्रभावेन आसनं चलितं मम । संप्राप्तो देवि तत्रैव य
त्र त्वं सखिभिः सह । प्रसन्नोस्मि मया प्रोक्तो वरं वरय सुव्रते ॥ पार्वत्युवा
च ॥ यदि देव प्रसन्नोसि भर्त्ता भव महेश्वर ॥ तथेत्युक्त्वा मया देवि कैलासं
पुनरागमत ॥ ततः प्रभाते संप्राप्ते नद्यां सर्वं विसर्जितं ॥ पारणं च कृतं तत्र
कंदमूलादिभिः स्त्वया । ततः सुप्ता त्वं देवि सखिभिः सार्द्धमेव च ॥ हिमवां

स्मात्तदा तत्र निर्जनं वनमागतः ॥ वाहुर्दिक्षु निरिक्ष्यान्स विकलस्त्वन्नवर्जि
तः ॥ दृष्टं तत्र नदीतीरे प्रसुप्तं कन्यकाहृयं । उत्थाप्योत्संगमानीता रोदनं व
कृतं बहु ॥ उवाच वत्स्या घृसिंहाद्य किमर्थं वनमागता । पार्वत्युवाच ॥ शृणु
तात मया ज्ञातं दास्यसे शंकराय मे ॥ तदन्यथा कृतं तात तदर्थं वनमाग
ता । नागमिष्यामि गृहे तात यदि दास्यसि शंभवे । तथेत्युक्त्वा हिमवता ।
नीतासि त्वं गृहं प्रति । ततः प्रयुक्तो मस्माकं कृत्वा वैवाहिकीं क्रियां ॥ तेन
व्रतप्रभावेन सौभाग्यं साधितं त्वया ॥ त्वदादि व्रतराजस्त्व कस्यापि न नि

वादितः ॥ व्रतराजस्य नामेदं शृणु देवि यथाभवत् ॥ आलिभिर्हरिता यस्मात्तस्मा
त्त्वं हरितालिका ॥ पार्वत्युवाच ॥ नामेदं कथितं देव विधिं वद मम प्रभो ॥ किं पुण्यं
किं फलं चास्य केन वा क्रियते विधिः ॥ ईश्वर उवाच ॥ शृणु देवि विधिं वक्ष्ये नारी
णां व्रतमुत्तमं ॥ कर्तव्यं तु प्रयत्नेन यदि सौभाग्यमिच्छति ॥ तोरणादि प्रकर्तव्यं क
दलीस्तंभमंडितं ॥ माणिवैडूर्यरत्नैश्च नानावस्त्रैर्विचित्रितं ॥ चंदनादि सुगंधै
श्च लेपयेद्गृह मंडपं मंडलं कारयेत्तत्र सर्वतोभद्रसंज्ञिकं ॥ शंखभेरीमृदंगैश्च
घंटनादैर्मनोहरैः ॥ नानामंगलवा[illegible] ॥ द्यैश्च कर्तव्यो मम सन्नि

हरा० स्थापयेद्ब्राह्मणो कुंभंम्नन्मपं व दृढं नवं । तस्योपरिन्यसेत्पात्रं ताम्रं वा वेणुजं शु
६ शुभं ॥ कलशं च प्रतिष्ठाप्य यथोक्तविधिना सुधीः ॥ पूजयेद्ब्राह्मणं तत्र तस्योपरि शि
वौ तमः ॥ स्थापयेद्धालकापिंडं पार्वत्या सहितं मम कलशोपरि संस्थाप्य पू
6 ज्योतौ पार्वतीश्वरौ प्रतिष्ठावाहनार्घं च पूजां कुर्यात्क्रमेण तु ॥ प्रतिष्ठावेदमन्त्रै
श्चकर्तव्या च समाहितः उपोष्य पूजयेत् भक्त्या कुर्याज्जागरणं निशि ॥ नारिकेलैः
सजंबीरैः फलैर्नानाविधैरपि ॥ जातिफलैर्लवंगैश्च पूजयेद्देवपन्नतः ॥ क्रतुदे
शोद्भवैः सर्वैर्नैवेद्यैः कुसुमैर्नवैः ॥ धूपदीपादिगंधैश्च मंत्रेणानेन पूजयेत् ॥ ६

शिवायै शिवरूपायै मंगलायै महेश्वरि ॥ शिवे सर्वार्थदे देवि शिवरूपे नमोस्तु ते ॥
शिवरूपे नमस्तुभ्यं शिवायै सततं नमः ॥ नमस्ते सर्वरूपिण्यै जगन्मात्रे नमो न
मः । संसारभयसंतापात्पाहि मां सिंहवाहिनि ॥ मया घ्येन कामेन पूजिता
सि महेश्वरि । यथा हिमवतो जन्म जातं तस्योदरे शिवे । पार्वतीति समारव्याता
जगतां जननी यतः । मतः स्तस्त्वा पतिं लब्ध्वा शंकरं लोकशंकरं ॥ अतस्त्वं हि प्र
सादेन सौरव्यं ॥ देहि वमे सदा ॥ पुत्रान्देहि पशून्देहि सर्वसौभाग्यमेव व
राज्यं देहि ससौरव्यं वप्रसन्ना भव पार्वति । एवं कृत्वा पिवं ध्यात्वां मतवत्सा
दि दुषणां ॥ सर्वाण्येतानि नश्यं तु त्वत्प्रसादान्महेश्वरि ॥ मंत्रेणानेन भो दे

तृ० विसंपूज्यत्वांमपासत्त॥ कथांश्रुत्वाविधानेनदद्याद्दानानिशक्तितः॥ आचार्यायप्रदा
१ तव्यंवस्त्रंधेनुंहिरण्यकं॥ कथांश्रुत्वैकचित्तेनदंपतीभ्यांसदैवतु॥ पूजनंचततःकुर्या
त् धूपपुष्पादिभिस्तथा॥ कृत्वाव्रतमिदंदेविसर्वपापैःप्रमुच्यते॥ सप्तजन्मभवेद्रा
ज्यंसौभाग्यंचैववर्द्धते॥ तृतीयायांतुयानारीआहारंकुरुतेयदि॥ सप्तजन्मभवेद्वं
ध्याचैधव्यंचपुनःपुनः व्याघ्रीभवतिसानारीराक्षसीचैवदारुणा॥ यान्नकुरुतेना
रीतृतीयाव्रतमुत्तमं॥ यमस्यवशमाप्नो दारिद्र्यंपुत्रशोकंचकर्कशादुःखभा
गिनी॥ प्रयातिनरकंघोरंनोपवासंकरोतिया॥ कांचनेराजतेताम्रेवेणुमन्मं १

यभाजने।।तस्मिन्पात्रेवनिक्षिप्यपक्वान्नैर्विविधैःफलैः॥वायनंवगुरवेदद्यात्
ततःकुर्याच्चपारणं॥एवंविधिंयाकुरुतेवनारीव्रपासमानारमतेवभर्त्रा॥भुक्त्वा
तुकामान्विविधानिहैवविनाशकालेममतुल्यरूपं॥ऊर्ध्वमेधसहस्राणिवा
जपेयशतानिच॥कथाश्रवणमात्रेणलभतेपुत्रम॥एतत्तेकथितंदेवि
तवाग्रेव्रतमुत्तमं॥प्रजायाश्चेवसंप्रोक्तोविधिःसर्वफलप्रदः॥गोमूत्रमिंवसुवर्णं
निवस्त्रदानपुरस्सरं।जागरंचततःकुर्यात्सर्वकामार्थसिद्धये॥आख्यानकंव्र
तमिदंसुतवित्तसौख्यंयास्त्रीवरिष्यतिशिवंहृदयेनिधाय॥प्राप्नोतिसौख्यमतु

हरि० त्वंसुतवित्तकांतिंसास्त्रीभविष्यतिशिवाशिवयाःप्रसादात॥ इतिश्रीभविष्योत्तरपुराणेहरि
८ तालिकाव्रुतंसमाप्तं॥लिखितंकाश्यांगंगासंनिधौ॥रामरारामरामरामरामरामरामराम

कपुरगोरस्यइदंपुस्तकं हरितालकाव्रत १२०